पविष्यमाणः, पावयिष्यमाणः, पिपविषिष्यमाणः, पोपूयिष्यमाणः ;

पूः-पुवौ-पुवः ; — — —

[1]पूतम्-पवितम्-[A]तः-तवान्, पावितः, पिपविषितः, पोपूयितः-तवान् ;

पवः, [2]पवमानः, [3]पवनः, [4]पवित्रम् [अग्निः, देवता वा ], [5]पोता,

पावः, [B]पिपविषुः-[6]पिपावयिषुः, पोपुवः ;

पवितव्यम्, पावयितव्यम्, पिपविषितव्यम्, पोपूयितव्यम् ;

[7]प्रपवणीयम्-प्रपवनीयम्, [8]प्रपावणीयम्-प्रपावनीयम्, पिपविषणीयम्,

पोपूयनीयम् ;

---

1. 'पूङश्च' (7-2-51) इति निष्ठाया इड्विकल्पः। 'पूङः क्त्वा च' (1-2-22) इति निष्ठायाः कित्त्वनिषेधाद् गुणावादेशौ। एवं क्त्वायामपि रूपद्वयस्योपपत्तिर्ज्ञेया।

2. कर्तरि, 'पूङ्यजोः शानन्' (3-2-128) इति शानन्प्रत्ययः। शपि, 'आने मुक्' (7-2-82) इति मुगागमः।

3. नन्द्यादित्वात् (3-1-134) कर्तरि ल्युप्रत्यये, अनादेशे च रूपम्। पवनः=वायुः।

4. 'कर्तरि चर्षिदेवतयोः' (3-2-186) इति कर्तरि ऋषौ, देवतायां वा अभिधेये सति इत्रप्रत्ययः। ऋषिः=अग्निः। 'अग्निः पवित्रम्, स मा पुनातु,' (आप. श्रौ. सू. 12-19-6) 'वायुः सोमः सूर्य इन्द्रः पवित्रम्, ते मा पुनन्तु।' (आप. श्रौतसूत्रे 12-9-6) इत्यादिषु यथा। ऋषौ करणे, देवतायाम् कर्तरि चायं प्रत्ययो ज्ञेयः।

5. 'तृन्' (3-2-135) इति तच्छीलादिषु कर्तृषु तृन्प्रत्ययः। बाहुलकात् इडागमाभावः।

6. ण्यन्तात् सनि, उप्रत्यये रूपम्। अत्रापि 'ओः पुयण्ज्यपरे' (7-4-80) इति अभ्यासस्येकारः। तत्प्रदर्शनार्थमेवात्र रूपमेकं निर्दिशतम्।

7. 'न भाभूपू—' (8-4-34) इत्यत्र 'पू' इत्यनेन पूञ एव ग्रहणम्, न तु पूङः इति काशिकादिषु दृश्यते। तेनात्र णत्वं भवत्येव। क्षीरस्वामी तु अविशेषेण पूङोऽपि प्रकृतसूत्रे ग्रहणं मन्यमानः प्रपवनीयम् इति णत्वाभावघटितं रूपमुदाजहार।

8. 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति णत्वनिषेधोऽपि नास्य धातोरिति पक्षे रूपमेवम्। क्षीरस्वामिमते तु पूर्ववदत्रापि णत्वनिषेधः।

A. 'पवितोऽनुगुणैर्वातैः शीतैः पूत्वा पयोनिधौ।' भ. का. 9-39.

B. 'जगत् पिपविषुर्वायुः कल्पान्त इव दुर्धरः॥' भ. का. 9-53.